# श्रीसुरसरस्वतीसभा, शृङ्गेरी

## तृतीया परीक्षा–प्रथमपत्रिका

दिनाङ्कः – 31–01–2021 | प्रातः 10:00 तः 1:00 पर्यन्तम्

समयः – होरात्रयम् | अङ्काः – 100

**1. पञ्चानां प्रश्नानां संस्कृते एकवाक्येन उत्तरं लिखत ।** 5

1. गणेशं के कदा नमस्कुर्वन्ति ?
2. अचक्षुषां चक्षुः कः ?
3. शुकदम्पती कुत्र न्यवसताम् ?
4. केन समस्य पूरिता ?
5. एकलव्यः कः ?
6. कौशिकः कीदृशः विप्रः आसीत् ?

**2. षण्णां प्रश्नानाम् उत्तरं द्वित्रैः वाक्यैः संस्कृते लिखत ।** 12

1. नव गोप्यानि कानि ?
2. वाग्देवता स्वहस्तेषु किं किं धारयति ?
3. एकलव्यः किमर्थं द्रोणसमीपम् अगच्छत्? द्रोणः तस्मै किमुत्तरं प्रायच्छत्?
4. ब्राह्मणपुत्रः दीनारकं दृष्ट्वा किं चिन्तितवान् ?
5. आर्यः अनार्यः च कथं पततः ?
6. मल्लस्य सामर्थ्यं विशदयत ।
7. शङ्कराचार्यैः कुत्र कुत्र मठाः स्थापिताः ?
8. गृहिणी द्विजं किमवदत् ? धर्मव्याधः कुत्र न्यवसत् ?

**3. त्रयाणां प्रश्नानाम् उत्तरं पञ्चषैः वाक्यैः संस्कृते लिखत ।** 9

1. विष्णुशर्मणा राजपुत्राः कथं कोविदाः संवृत्ताः ?
2. प्रातःकाले वायसः किमपश्यत् ? किमचिन्तयत् च ?
3. केषां मतिः क्षीयते ?
4. मारुतिः सागरस्य उपरि किं किं कृतवान् ?
5. ब्रह्मा कदा देवानां पुरतः आविर्बभूव ?

4. चतुर्णां प्रश्नानाम् उत्तरं दशभिः वाक्यैः मातृभाषया लिखत । 16

1. ब्राह्मणसर्पयोः वृत्तान्तः ।
2. विष्णोः वर्णनं कुरुत ।
3. कालिदासः सर्वैः कथं कविचक्रवर्ती इति अमन्यत ?
4. विक्रमस्यौदार्यं वर्णयत ।
5. श्रीशङ्कराचार्यस्य बाल्यम्, अध्ययनं, जीवनं, च वर्णयत ।

5. चतुर्णां सन्दर्भं मातृभाषया विवृणुत । 12

1. शयीमहि महीपृष्ठे ।
2. त्वां लोकोत्तरं धनुर्धरं करिष्यामि ।
3. भवति भिक्षां देहि ।
4. सर्पेण युक्तमेव कृतम् ।
5. केवलं जगति तेऽपि राक्षसाः ।

6. द्वयोः अन्वयानुसारम् अर्थं मातृभाषया लिखत । 4

1. स्वकालपरिमाणेन व्यस्तरात्रिन्दिवस्य ते ।
   यौ तु स्वप्नाऽवबोधौ तौ भूतानां प्रलयोदयौ ॥
2. विद्यया विमलयाऽप्यलङ्कृतो दुर्जनः सदसि मास्तु कश्चन ।
   साक्षरा हि विपरीततां गताः केवलं जगति तेऽपि राक्षसाः ॥
3. ततः शक्रजिता युद्धे बद्धः पवननन्दनः ।
   प्रतापं रघुनाथस्य रावणं तं न्यवेदयत् ॥

7. श्लोकद्वयं पूरयत । 4

1. दोर्भिर्युक्ता_______सुप्रसन्ना ॥
2. राजा घृणी______न वेत्ति ॥
3. निन्दन्तु __________ न धीराः ॥

8. अस्य गद्यस्य अनुवादं कुरुत । 4

द्रोणस्य तादृशं वचनं श्रुत्वा आत्मनः प्रतिज्ञां रक्षन् एकलव्यो मुदा दक्षिणकराङ्गुष्ठं छित्वा द्रोणाय प्रादात्। एकलव्यस्य तादृशीं वीरभक्तिं विलोक्य सर्वे विस्मिता अभवन्। देवाश्च तस्योपरि कुसुमवृष्टिम् अवर्षन्। ततः स पूर्ववत् शरान् मोक्तुमसमर्थोऽभवत् ।

9. रिक्तस्थानानि पूरयत । 4

1. नास्ति तेषां यशःकाये _______________ भयम् ।

2. न पराभवमाप्नोति _______________ कदाचन ।

3. यद्दत्वा च _____________________ भवेत् ।

4. तेन मन्त्रेण ___________________भविष्यति ।

10. त्रयाणां पर्यायपदानि लिखत । 3

1. सितः 2. प्रथितः 3. गृहम् 4. तोयम्

11. त्रयाणां विरुद्धपदं लिखत । 3

1. सदा 2. द्राक् 3. उपरि 4. आद्याय

12. वाक्यदोषं परिहरत । 3

1. ग्रामस्य समया उपवनम् अस्ति । 2. सीतायाः समं रामः गच्छति ।

3. भवान् गच्छ ।

13. त्रयाणां सन्धिं विभज्य सन्धिनाम लिखत । 3

1. देवतेयम् 2. पत्युर्वियोगेन 3. अब्रवीच्च 4. यन्मम

**14. त्रीणि पदानि संस्कृतवाक्येषु योजयत ।** 3

1. एव   2. धाम   3. सर्गः   4. सम्यक्

**15. एकस्य रूपाणि सर्वपुरुषवचनेषु लिखत ।** 3

1. अपृच्छत्   2. ददाति   3. निन्दतु

**16. लोकोक्तिं पूरयित्वा मातृभाषया विवृणुत । ( द्वे एव )** 4

1. संभावितस्य ______अतिरिच्यते ।   2. क्लेशः _______ विधत्ते ।

3. याञ्चा __________लब्धकामा ॥

**17. संयोज्य लिखत ।** 4

| अ | आ |
|---|---|
| 1. शिवं वन्दे | अ) जश्त्वसन्धिः |
| 2. अम्मयम् | आ) पूर्वसवर्णसन्धिः |
| 3. षडाननः | इ) परसवर्णसन्धिः |
| 4. त्वङ्करोषि | ई) अनुस्वारसन्धिः |
| | उ) अनुनासिकसन्धिः |

**18. प्रयोगपरिवर्तनं कुरुत ।** 4

1. तेन पूजा न कृता ।
2. मत्पुत्रः स्वकर्मणः फलम् अनुभूतवान् ।
3. बालिकया चित्रं लिख्यते ।
4. विष्णुशर्मणा राजपुत्राः पाठिताः।

* * *

## श्रीसुरसरस्वतीसभा, शृङ्गेरी

### तृतीया परीक्षा– द्वितीयपत्रिका

दिनाङ्कः– 31–01–2021 अपराह्नः 1:30तः 3:00 पर्यन्तम्

समयः–सार्धैकहोरा अङ्काः– 50

1. दशभिः वाक्यैः संस्कृतभाषया प्रबन्धमेकं लिखत । 5

 1. उद्यानम् 2. दीपावलिः 3.वाराणसी

2. संस्कृतभाषया पत्रमेकं लिखत । 5

 1. शालायाः क्रीडोत्सवं वर्णयन् मित्रं प्रति पत्रं लिखत ।

 2. अनारोग्यकारणं संसूच्य मुख्योपाध्यापकं प्रति विरामपत्रं लिखत ।

3. द्वयोः लक्षणं सोदाहरणम् आङ्ग्लभाषया कर्नाटकभाषया वा लिखत । 6

 1. उपसर्गः 2. शतृप्रत्ययः 3. अव्ययम्

4. वाक्यदोषान् समीकुरुत । (त्रयाणामेव) 3

 1. वयं देवालयं गच्छन्ति । 2. अहं पाठं पठति ।

 3. रजतं स्वर्णाय भिन्नम् । 4. लक्ष्मणः सीतां वदसि ।

5. एकस्य शब्दस्य रूपाणि सर्वविभक्तिवचनेषु लिखत । 4

 1. गुरुः 2. अस्मद् 3.नदी

6. द्वे क्रियापदे पुरुषत्रये लिखत। 6

 1. अपृच्छत् 2.स्तौतु 3. क्षीयते

7. संस्कृतवाक्ये योजयत । 4

 1. पठितुम् 2. प्राक् 3. इव 4. उपविश्य

8. वाक्यमेकं विवृणुत ।  2

1. हितं मनोहारि च दुर्लभं वचः ।  2. अल्पविद्यः महागर्वी ।

9. त्रयाणाम् अन्यलिङ्गरूपं लिखत ।  3

1. कृतवान्  2. त्रयः  3. तेषु

10. एकस्य व्याकरणविशेषं लिखत ।  2

1. आस्ते स्म  2. कपोतराजः

11. अनुवादं कुरुत ।  5

1. ರಾಮನು ಸೀತೆಯೊಡನೆ ಅಯೋಧ್ಯೆಯನ್ನು ಪ್ರವೇಶಿಸಿದನು.

   Rama entered Ayodhya **along** with Sita

2. ಗಂಗಾನದಿಯು ಹಿಮಾಲಯದಿಂದ ಹರಿಯುತ್ತದೆ .

   Ganga river flows from the Himalayas.

3. ಸ್ನೇಹಿತರೆ, ನೀವು ಯಾವಾಗ ಹಳ್ಳಿಯಿಂದ ಬಂದಿರಿ ?

   Friends, when did you come from the village ?

4. ಕಪ್ಪಾದ ಮೋಡಗಳು ಆಕಾಶದಲ್ಲಿ ತೇಲುತ್ತವೆ.

   Dark clouds move in the sky.

5. ರಥವನ್ನು ಏರಿ ಸೈನಿಕನು ಮುಂದೆ ಹೊರಟನು.

   Having ascended the chariot, the soldier moved forward.

12. संस्कृतभाषया अनुवादं कुरुत ।  5

1. गौरी लेखन्या लिखति ।  2. देवः सर्वत्र वसति, सः सर्वव्यापी ।

3. कीटाः सस्यानि बाधन्ते ।  4. श्वः मात्रे पत्रं लिख ।

5. भूपालाः प्रजानां हितमिच्छन्तु ।

* * *